Department of Sanskrit

University of Mumbai

MA Entrance Examination 2015-2016

Paper I – Unseen Translation

Date – 21/08/2015 Duration – 3hrs

Day – Friday Marks - 100

Translate into English/ Marathi १५

1. किमर्थम् एषः एवं पृच्छति इति अविज्ञाय क्षणं यावत् दिङ्मूढा अपि जानकी झटिति पूर्वतनं तं प्रसङ्गं स्मृत्वा स्वयमपि तदेव वाक्यम् उक्तवती - "कामम् उपविश्यताम्" इति| द्वयोरपि वदनयोः हासः व्यलसत् |

"अहं किञ्चित् निवेदयितुकामः अस्मि" - शेखरोऽवदत् |

"आदिशतु" सा उक्तवती |

"अग्रे यदि यत्र क्वापि वाहनं नष्टं भवेत् तर्हि वराकम् इमं परित्यज्य न गन्तव्यं भवत्या... |"

जानकी सशब्दं हसितवती | ततः उक्तवती च - "इतःपरं कदापि तथा न भविष्यति| यतः भवता एव खलु सर्वत्र अहं नेतव्या भविष्यामि | यत्र भवान् नेता भविष्यति तत्र अहं केवलं नीता भविष्यामि |

अधुना शेखरोऽपि उच्चैः हसितवान् | ततः पूर्वतनं तं लोकयानप्रसङ्गमेव स्मरन् उक्तवान् - "तस्मिन् दिने मया किञ्चित् अकार्य कृतम् |"

२. १५

मलयकेतुः - आर्य, प्रयाणे कथं प्रतिविहितमिति श्रोतुमिच्छामि |

राक्षसः - कुमार, एवमादिष्टा कुमारानुयायिनो राजानः |

Scanned with CamScanner

( प्रस्थातव्यमिति पूर्वोक्तं पठति| )

मलयकेतु: - ( स्वगतम् | ) कथं य एव मद्विनाशेन चन्द्रगुप्तमाराधयितुमुद्यतास्त एव मां परिवृण्वन्ति| ( प्रकाशम् ) आर्य अस्ति कश्चिद्य: कुसुमपुरं प्रति गच्छति तत आगच्छति वा |

राक्षस: - अवसितमिदानीं गतागतप्रयोजनम् | अल्पैरहोभिर्वयमेव तत्र गन्तार: |

मलयकेतु: - ( स्वगतम् ) विज्ञायते | ( प्रकाशम् ) यद्वेवं तत: किमार्येणायं सलेख: पुरुष: प्रेषित: |

राक्षस: - ( विलोक्य ) अये सिध्दार्थक: | भद्र किमिदम् |

सिध्दार्थक: - ( सबाष्पं लज्जां नाटयन् ) प्रसीदत्वमात्य: | ताड्यमानेन मया न पारितं रहस्यं धारयितुम् |

राक्षस: - भद्र कीदृशं रहस्यमिति न खल्ववगच्छामि |

३. १५

एकदा भगवान् बुध्दस्तं ब्रह्मचारिणमद्राक्षीत् अभिललाष च तं शिक्षयितुमीदृक्षां कलां या खलु तेनाभ्यस्तचरीभ्य: सकलाभ्योऽपि कलाभ्यो महीयसी स्यात् | अतश्च स्थविरश्रमणरूपमास्थाय स करधृतभिक्षापात्र: तं युवानमुपतस्थौ |

"को भवान् ?" ब्रह्मचारी पप्रच्छ |

"स्वशरीरं वशीकर्तुमीशोऽहमस्म्ये | को मनुष्य: |"

"को न्वभिप्रायोऽस्या भवद्गिर: ?"

बुध्द: प्रत्युवाद, "कश्चिद् धानुष्क: शरव्ये शरं संधातुमवैति, पोतवाह: पोतं वहति, शिल्पी भवनरचनां पर्यवेक्षते | किन्तु ज्ञानवान् स्वात्मानमनुशास्ति |"

"कथमिव ?"

Scanned with CamScanner

"कोऽपि तं प्रशंसति चेत् तस्य चित्तं न विचलति; कश्चिदमुं निन्दति चेत् तस्य स्वान्तं शान्तमेवावतिष्ठते; सत्यधर्माचरणे स भृशमनुरज्यते तत एव च परमशान्तौ निवसति" इति ।

४. १५

अद्य भारतवर्षे 'धर्म'-शब्दस्य चर्चा कामपि वरीयतां प्राप्ता दृश्यते । एकतः हिन्दुत्ववादिनः सन्ति ये धर्मतत्वं स्वोत्कर्षस्य मार्गदर्शकं सूत्रं मन्यन्ते । अपरतः तथाकथिताः धर्मनिरपेक्षतावादिनः सर्वप्रकारकाः हिन्दुविरोधिनः सान्ति ये धर्म समस्तस्य संघर्षस्य रक्तपातस्य च बीजं तथा राष्ट्रविभाजकं तत्त्वं मन्यन्ते । अतः धर्मतत्त्वस्य सर्वकषं मन्थनं कृत्वा निष्कर्षनवनीतं प्राप्तुम् अत्र प्रयत्यते ।

प्रथमं तावत् धर्मशब्दस्य वास्तविकः अर्थः, धर्मतत्त्वस्य उत्पत्तिः तस्य समाजजीवने दृढमूलतां गतः प्रसारः, तस्य अद्य क्रियमाणा दुर्दशा इत्यादिविषयाणां विश्लेषणपूर्वको विचारः आवश्यको भवति । तदनन्तरं धर्मस्य रक्षणं नाम परमार्थतः किम् अपेक्ष्यते, अद्यतन्याः परिस्थित्याः सन्दर्भे धर्मपालनं कथं कर्तव्यम् इत्यस्य प्रश्नस्य विश्लेषणात्मिका चर्चा वाञ्छनीया स्यात् ।

५.

वयं तदभिगच्छामो वनमिक्ष्वाकुनन्दन । १०
तस्याः प्रिये स्थितो रामो देव्या दिव्यार्थरूपया ॥
सहितस्तदशोकानां विशोकः प्रययौ वनम् ।
तदशोकवनं रामः सभार्यो व्यचरत्तदा ॥
गिरिपुत्र्या पिनाकीव सह हैमवतं वनम् ।
तावन्योन्यमशोकस्य पुष्पैः पल्लवधारिभिः ॥
समलंचक्रतुरुभौ कामिनौ नीललोहितौ ।
आबध्दवनमालौ तौ कृतापीडावतंसकौ ॥

६.

अदाता पुरुषस्त्यागी धनं सञ्चित्य गच्छति । १०
दातारं कृपणं मन्ये मृतोऽप्यर्थं न मुञ्चति ॥
अनित्यानि शरीराणि वैभवं नैव शाश्वतम् ।

Scanned with CamScanner

नित्यसन्निहितो मृत्युः कर्तव्यो धर्मसङ्ग्रहः ॥
मा दद्यात् खलसङ्घेषु कल्पनामधुरा गिरः ।
यथा वानरहस्तेषु कोमलाः कुसुमस्रजः ॥
आयुषः खण्डमादाय रविरस्तमयं गतः ।
अहन्यहनि बोद्धव्यं किमेतत्सुकृतं कृतम् ॥

७. 20

श्रुत्वा यथेष्टं च कुरु वीर यत्तव रोचते ।
भवान्प्राज्ञतमो नित्यं मम चैव परा गतिः ॥
भीष्मद्रोणावतिरथौ हतौ सेनापती मम ।
सेनापतिर्भवानस्तु ताभ्यां द्रविणवत्तरः ॥
वृध्दौ च तौ महेष्वासौ सापेक्षौ च धनञ्जये ।
मानितौ च मया वीरौ राधेय वचनात्तव ॥
पितामहत्वं सम्प्रेक्ष्य पाण्डुपुत्रा महारणे ।
रक्षितास्तात भीष्मेण दिवसानि दशैव ह ॥
न्यस्तशस्त्रे च भवति हतो भीष्मः पितामहः ।
शिखण्डिनं पुरस्कृत्य फल्गुनेन महाहवे ॥
हते तस्मिन्महाभागे शरतल्पगते तदा ।
त्वयोक्ते पुरुषव्याघ्र द्रोणो ह्यासीत्पुरःसरः ॥
तेनापि रक्षिताः पार्थाः शिष्यत्वादिह संयुगे ।
स चापि निहतो वृध्दो धृष्टद्युम्नेन सत्वरम् ॥

---

Scanned with CamScanner

# DEPARTMENT OF SANSKRIT
# UNIVERSITY OF MUMBAI

## M.A. Entrance Examination 2015-2016

## Paper II : History of Classical Sanskrit Literature

Date : 21st August, 2015 Duration : 3 hours

Day : Friday Marks : 100

Q.1. Write exhaustive notes (any two) (40)

a) भासनाटकचक्रम्

b) कुमारसंभवम् Of कालिदास

c) Story literature in Sanskrit

Q.2. Write critical notes ( any four) (60)

i) Historical Poetry in Sanskrit

ii) नैषधीयचरितम् Of श्रीहर्ष

iii) Dramas of भवभूति

iv) कादंबरी of बाणभट्ट

v) अभिज्ञानशाकुन्तलम्

vi) गीतगोविंद of जयदेव

Scanned with CamScanner